द्धाशेषपरिजनो दत्तकवाटस्तं दिवसं तथैव निशामपि कथमप्यनैषीत्। अथ मकरन्दो नाम तस्य प्रियसखः कथमपि लब्धप्रवेशदर्शनः, सारतराण्युपदेशगर्भाणि वचनान्याचक्षाणोऽपि, स्मरशरप्रहारपरवशे तस्मिन्विफलप्रयत्न एवाभवत् ।

ततश्च 'वयस्य नायमुपदेशकालः। पच्यन्त इव मेऽङ्गानि। निःसरन्तीव प्राणाः। नष्टेव स्मृतिः। अधुना तदलमनया समुपदेशकथया। मया सममागम्यताम्' इति वदन्कन्दर्पकेतुः सह मकरन्देन अनेकनल्वशतमध्वानं गत्वा, रेवयोपगूढं विन्ध्यं नाम गिरिमुपेत्य, विन्ध्याटव्या कतिपयपदमध्वानं गत्वा, तत्र कस्यचन जम्बूतरोरधश्छायायां विशश्राम ।

अत्रान्तरे भगवानपि मरीचिमाली चरमाचलशिखरमारुरोह। ततः कन्दर्पकेतुर्मकरन्दानीतैः फलमूलैः कथमप्याहारमकार्षीत्, तदुपभुक्तशेषेण च मकरन्दः। अथ याममात्रावखण्डितायां यामवत्यां जम्बूतरुशिखरे मिथः कलहायमानयोः शुकशारिकयोः कलकलं श्रुत्वा 'शृणुवस्तावदनयोरालापम्' इति दत्तावधानयोः सतोः कन्दर्पकेतुमकरन्दयोः, समुपजातकुतूहलया शारिकया मुहुर्मुहुरनुबध्यमानः शुकः कथां कथयितुमारेभे ।

'अस्ति कुसुमपुरं नाम नगरम्। यत्र च महिषासुरगिरिवज्रधारा भगवती कात्यायनी चण्डाभिधाना स्वयं निवसति। यस्य च परिसरे भगवती भागीरथी प्रवहति। तत्र महावीरो धर्मात्मा शृङ्गारशेखरो नाम राजा प्रतिवसति। तस्य चाभूदेवंविधस्य राज्ञो महिषी सर्वान्तःपुरप्रधानभूता अनङ्गवती नाम। तयोश्च मध्यमोपान्ते वयसि

SGDF
Sri Gargeshwari Digital Foundation

वर्तमानयोः कथमपि दैववशात् त्रिभुवनविलोभनीयाकृतिस्तनया-भूद्वासवदत्ता नाम। अथ सा परिणाममुपयात्यपि यौवने परिण-यपराङ्मुखी तस्थौ।

अथैकदा वसन्तकाले, वासवदत्तासखीजनाद्विदितसुताभिप्रायः शृङ्गारशेखरः स्वसुतायाः स्वयंवरार्थमशेषधरणितलभाजां राजपुत्राणामेकत्र मेलनमकरोत्। ततः सुमनोलंकृतं मञ्चमारूढा वासवदत्ता क्षणेनैतानेकैकशः समवलोक्य विरक्तहृदया सती तस्मात्कर्णीरथा-दवततार।

अथ तस्यामेव रात्रौ सा स्वप्ने, आदिकन्दं शृङ्गारपादपस्य प्रथ-मबीजं विद्यालतानां मूलगृहं शीलसंपदस्त्रिभुवनरमणीयाकृतिं कंचि-द्युवानं ददर्श। स चिन्तामणिनाम्नो राज्ञस्तनयः कन्दर्पकेतुरिति स्वप्न एव तन्नामादिकमशृणोत्। प्रबुद्धा च सा तस्य रूपं लावण्यं कान्तिं च मुहुर्मुहुर्भावयन्ती मदनदावाग्निशिखाकबलिता, हृदये विलि-खितामिव उत्कीर्णमिव प्रत्युप्तमिव कीलितामिव कन्दर्पकेतुं मन्यमाना, उन्मत्तेव अन्धेव बधिरेव मूकेव सती, शैत्योपचारचतुरान्सखीज-नान्बहुविधं भाषमाणा क्षणान्तरे च मूर्च्छन्ती, अनन्तरं परिजन-प्रयत्नोच्छ्वसितजीविता, तदीयरूपनामधामानि चिन्तयन्ती, दिक्षु विलिखितमिव नभस्युत्कीर्णमिव चित्रपटे पुरोदर्शितमिव तमितस्ततो विलोकयन्ती व्यतिष्ठत। अथ तस्यास्तमालिका नाम शारिका तत्प्रियसखीभिः समं समालोच्य कन्दर्पकेतुभावमाकलयितुं प्रेषिता। सापि मया सार्धं प्रस्थितागता चात्रैव तरोरधस्तात्तिष्ठति।' इत्युक्त्वा शुको विरराम।

SGDF
Sri Gurgeshwari Digital Foundation